# ९. श्री सिद्धिधात्री स्तोत्रं (नवदुर्गेषु नवम दुर्गा)

## ध्यानं

वन्दे वांछितमनरोरार्थे चन्द्रार्घ कृत शेखराम् |
कमलस्थिता चतुर्भुजा सिद्धि यशस्वनीम् || १ ||

स्वर्णावर्णा निर्वाण चक्र स्थितानवम् दुर्गा त्रिनेत्राम |
शंख चक्र गदा पदमधरा सिद्धिदात्री भजेम् || २ ||

पटाम्बर परिधानां सुहास्या नानालंकार भूषिताम् |
मंजीर हार केयूर किंकिणि रत्नकुण्डल मण्डिताम् || ३ ||

प्रफुल्ल वदना पल्लवाधराकांत कपोलापीन पयोधराम् |
कमनीयां लावण्यां क्षीणकटिं निम्ननाभिं नितम्बनीम् || ४ ||

स्तोत्र कंचनाभा शंख चक्र गदामधरा मुकुटोज्वलां |
स्मेरमुखी शिवपत्नी सिद्धिदात्री नमो अस्तुते || ५ ||

पटाम्बर परिधानां नानालंकार भूषितां |
नलिनस्थितां पलिनाक्षीं सिद्धिदात्री नमो अस्तुते || ६ ||

परमानंदमयी देवि परब्रह्म परमात्मा |
परमशक्ति परमभक्ति सिद्धिदात्री नमो अस्तुते || ७ ||

विश्वकर्ती विश्वभर्ती विश्वहर्ती विश्वप्रीता |
विश्वांचता विश्वतीता सिद्धिदात्री नमो अस्तुते || ८ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

भुक्ति मुक्ति कारणी भक्त कष्ट निवारिणी |
भवसागर तारिणी सिद्धिदात्री नमो अस्तुते || ९ ||

धर्मार्थ कामप्रदायिनी महामोह विनाशिनी |
मोक्षदायिनी सिद्धिदात्री सिद्धिदात्री नमो अस्तुते || १० ||

## अथ कवचम्

ओंकार: पातुशीर्षोमां ऐं बीजंमां हृदयो |
ह्रीं बीजं सदापातु नभो गृहोच पादयो || ११ ||

ललाट कर्णो श्रीं बीजं पातु क्लीं बीजं मां नेत्र घ्राणो |
कपोल चिबुको हसौ पातु जगत्प्रसूत्यै मां सर्व वदनो || १२ ||

## इति श्री सिद्धिधात्री स्तोत्रं सम्पूर्ण

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133